संस्कृत-वार्ता:

24-07-2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· वित्तमन्त्रिणा वित्तसङ्कल्पना-प्रपत्रे कैश्चित् राज्यैः सह भेदभावस्य प्रख्यापिताः आरोपाः निरस्तीकृताः।

· ब्रिटेनदेशस्य विदेशमन्त्री डेविड-लैमि इत्येषः अद्य सायं विदेशमन्त्रिणा एस् जयशङ्करेण सह वार्तां विधास्यति ।

· नेपालदेशे अद्य काठमाण्डूनगरस्य त्रिभुवन-अन्तराष्ट्रिय-वमानस्थानके एकस्यां दुर्घटनायां अष्टादशजना: दिवङ्गता: अभवन्।

· विलम्बितानां प्रकराणां सौहार्दपूर्णं समाधानं समाधातुं ,सर्वोच्चन्यायालयः जुलाईमासस्य नवविंशति-दिनाङ्कात् आरभ्य अगस्त मासस्य त्रिदिनाङ्कं यावत् विशिष्ट-लोकन्यायालयस्य आयोजनं करिष्यति ।

· भारतर्तुविज्ञान-विभागेन पूर्वानुमानितं यत् आगामिनं दिवसद्वयं यावत् गुजरात-कोंकण-गोवा-मध्यमहाराष्ट्र-राज्येषु अतिवृष्टि: सततं भविष्यति।

<u>वित्तसङ्कल्पना-प्रपत्रम्</u>

वित्तमन्त्रिणा निर्मला-सीतारामन्-वर्यया वित्तसङ्कल्पना-प्रपत्रे कैश्चित् राज्यैः सह भेदभावस्य प्रख्यापिताः आरोपाः निरस्तीकृताः। अद्य राज्यसभायां शून्यकालावधौ तया आरोपः प्रख्यापितः यत् कांग्रेस्-दलस्य नेतृत्वे अन्यैः विपक्षिदलैः भ्रामकसूचना-प्रसारणस्य सततं प्रयासः क्रियते यत् विपक्षिदलानां राज्यैः वित्तसङ्कल्पना-प्रपत्रे किमपि न प्राप्तम् । तया प्रोक्तं यत् कस्मिन्नपि वित्तसङ्कल्पना-प्रपत्रे सर्वेषां राज्याणां पृथक्-नामोच्चारणं नैव कर्तुं शक्यते । सा पुनरुक्तवती यत् यदि राज्य-विशेषस्य नाम वित्तसङ्कल्पना-प्रपत्रस्य भाषणसमये न गृहीतं, तर्हि अस्याशयं कदापि भवितुं न शक्नोति यत् केन्द्र-सर्वकारस्य तासां योजनानां लाभैः तानि राज्याणि वञ्चितानि स्युः । श्रीमती-सीतारामनवर्या इदमपि अकथयत् यत् केन्द्रीय-वित्तसङ्कल्पना-प्रपत्रे महाराष्ट्र-पश्चिम-बंगालयोः कृते अनेकानां विकास-कार्यक्रमाणां घोषणा कृता अस्ति । अद्य प्रातः सदनकार्याचरणस्य प्रारम्भे एव विपक्षस्य नेता मल्लिकार्जुन-खरगे एतत् प्रकरणं समुत्थापयन्

आरोपं प्रख्यापितवान् यत् संसदि प्रस्तुतं इदं केन्द्रीय-वित्तसङ्कल्पना-प्रपत्रं सर्वकारं रक्षितुं एकः प्रयासः आसीत् सहैव तेन प्रोक्तं यत् विपक्षिदलानि एतस्य विरोधं करिष्यन्ति । सः प्रोक्तवान् यत् असंतुलितेन वित्तसङ्कल्पना-प्रपत्रेण विकासः कथं भवितुं शक्यते ? अनन्तरं विपक्षिदलानि सदनात् बहिरगच्छन् । इतं पूर्वं, विपक्षि-सांसदानां स्थगनप्रस्तावं निरस्तं कुर्वन् सभापतिः जगदीप-धनखड़ः प्रोक्तवान् यत् राजनीतिक-दलानां नेतृभिः अस्मिन् विषये विचारः करणीयः । लोकसभायाम् अपि एतत् प्रकरणम् अधिकृत्य विपक्षिदलानां सांसदाः सदनात् बहिर्गतवन्तः । अद्य प्रातः सदनस्य उपवेशनावधौ एव कांग्रेस्, समाजवादी-पार्टी, डीएमके ,तृणमूल-कांग्रेस् चेत्यादीनां विपक्षिदलानां सदस्यैः सह अन्य-सदस्याः अपि अन्य-राज्यैः सह कृतं कथित-भेदभावम् अधिकृत्य विरोध-प्रदर्शन कृतवन्तः । लोकसभाध्यक्षः ओम-बिडला अकथयत् यत् शून्यकालसमये योजनाबद्धरूपेण सदनस्य कार्याचरणं बाधितं न कर्तव्यम् । केन्द्रीयमन्त्री-किरेन-रिजिजू अपि विपक्षि-सदस्यानां व्यवहारे प्रश्नं समुत्थापयत् । सः प्रोक्तवान् यत् सर्वदलीयोपवेशने विपक्षिदलानां सर्वैः नेतृभिः सदनस्य निर्बाध-कार्याचरणम् अधिकृत्य साहमत्यं व्यक्तं कृतमासीत्। सः प्रोक्तवान् यत् प्रश्नकालावधौ विरोध-प्रदर्शनं नोपयुक्तम् ।

<u>ब्रिटेनमन्त्री</u>

ब्रिटेनदेशस्य विदेशमन्त्री डेविड-लैमि इत्येषः अद्य सायं विदेशमन्त्रिणा एस् जयशङ्करेण सह वार्तां विधास्यति । लैमि इत्येषः मुख्यतया व्यापकं कार्यगतनीति-सहभागित्वं सदृढीकर्तुं चिरकालादेव प्रतीक्षारतं भारत-ब्रिटेन-मुक्त-व्यापार-सहभागित्वं च कर्तुं वार्ताम् अपि करिष्यति । ब्रिटेनदेशे प्रधानमन्त्रिणा कीर् स्टारम्र इत्येषः लेबर-पार्टीति दलस्य प्रशासनस्य सत्तारूढानन्तंरम् उभयोः देशयोः मध्ये इदं प्रथमम् उच्चस्तरीयोपवेशनं समनुष्ठीयते ।

<u>नेपाल-काटमाण्डू:</u>

नेपालदेशे अद्य काठमाण्डूनगरस्य त्रिभुवन-अन्तराष्ट्रिय-वमानस्थानके सौर्य-विमानसेवायाः उड्डयनसमये सहसैव जातायां एकस्यां दुर्घटनायाम् अष्टादशजना: दिवङ्गता: अभवन् । सौर्य विमानसेवाया: उड्डयनसंख्या नव-एन्-ए-एम्-ई इति नवदश-कर्मचारिण: तान्त्रिकान् च गृहीत्वा कस्मैचित् निर्माणकार्याय पोखरां प्रति याति स्म। वरिष्ठारक्षि-अधीक्षक: डम्बर-बहादुर बीके इत्येष: सूचितवान् यत् चालक-दलस्य सदस्येषु एक: जीवित: अस्ति सम्प्रति चिकित्सालये स: उपचाराधीनो वर्तते।

## सर्वोच्चन्यायालयः-जनन्यायालयः

विलम्बितानां प्रकराणां सौहार्दपूर्णं समाधानं समाधातुं एकस्मिन् महत्वपूर्ण-पदक्षेपे , सर्वोच्चन्यायालयः जुलाईमासस्य नवविंशति-दिनाङ्कात् आरभ्य अगस्त मासस्य त्रिदिनाङ्कं यावत् विशिष्ट-लोकन्यायालयस्य आयोजनं करिष्यति । भारतस्य मुख्य-न्यायाधीशे डी.वाई. चंद्रचूड़ेन ते नागरिकाः अस्य कार्यक्रमस्य लाभः समावाप्तुं प्रार्थिताः सन्ति येषां प्रकरणानि शीर्षन्यायालये चिर-विलम्बितानि सन्ति ।

## बिहार - विधेयकम्

बिहारराज्ये , राज्यस्य विधानसभा अद्य प्राशासनिक-प्रतियोगिता-परीक्षासु प्रश्नपत्राणां अवैधोद्घाटनं , अनियमितताः च विरुध्य एकं विधेयकं पारितम् अकरोत् । बिहार-सार्वजनिक-परीक्षा-विधेयकं 2024, इत्यस्य अन्तर्गतं गभीर-प्रकरणेषु वर्षत्रयात् समारभ्य दशवर्षाणि पर्यन्तं कारावासदण्डम् एककोटिरुप्यकाणां दण्डशुल्कं च प्रस्ताविते स्तः, जल-संसाधन-मंत्री विजय-कुमार-चौधरी इत्येषः एतत् विधेयकं प्रस्तुतम् अकरोत् । श्रीचौधरी सदने प्रोक्तवान् यत् बिहारराज्यं समेत्य सम्पूर्णदेशे परीक्षापत्राणाम् अवैधोद्घाटनस्य घटनाः सञ्जाताः। सः अकथयत् यत् अस्य विधेयकस्य उद्देश्यं परीक्षायोजकेषु सार्वजनिकेषु निकायेषु मेधाविछात्राणां अन्यप्रत्याशिनां च विश्वासवर्धनम् अस्ति ।

## सीएपीएफ-अग्निवीरः

बीएसएफ, सीआईएसएफ ,आरपीएफ चेत्यादीनि सैन्यबलानि समेत्य केंद्रीय-सशस्त्रारक्षिबलं पूर्वाग्निवीरान् सैनिकान् सेनायां सम्मेलितुं सज्जानि सन्ति । बीएसएफ इत्यस्य महानिदेशकेन नितिन-अग्रवालेन प्रोक्तं यत् पूर्वाग्निवीरैः सीमा-सुरक्षा-बले प्रवेशाय दश-प्रतिशन्मितं आरक्षणं आयुसीम्नि लाभः च प्राप्स्येते । सीआईएसएफ इत्यस्य महानिदेशिका नीना-सिंह इत्यनया अपि प्रोक्तं यत् गृह-मंत्रालयेन प्रतिपादितं निर्णयम् अनुसरत् , सीआईएसएफ-बलम अपि पूर्वाग्निवीरान् सम्मिलितं कर्तुं सज्जं वर्तते । पूर्वाग्निवीरेभ्यः कांस्टेबल इत्यस्मिन् पदे दश-प्रतिशन्मितं आरक्षणं आयु-शारीरिक-दक्षता-परीक्षायाम् च लाभः प्रदास्यते । आरपीएफ इत्यस्य महानिदेशकेन मनोज-यादवेन प्रोक्तं यत् रेलवे-सुरक्षा-बले आयुसाम्नि लाभेन सह पूर्वाग्निवीराणां स्वागतं कर्तुं तत्पराः स्मः ।

ऋतुविज्ञान-विभाग:

भारतीय-ऋतु-विज्ञान-विभागेन पूर्वानुमानितं यत् आगामिनं दिवसद्वयं यावत् गुजरात-कोंकण-गोवा-मध्यमहाराष्ट्र-राज्येषु अतिवृष्टि: सततं भविष्यति। विभागेन पुन: सूचितं यत् पञ्चदिवसानां काले हिमाचलप्रदेश-उत्तराखण्ड-जम्मूकश्मीर-लद्दाख-पञ्जाब-हरियाणा-उत्तरप्रदेश-राजस्थान-केरल-तेलङ्गाना-तमिलनाडु-राज्येष्वपि मध्यमस्तरीया वृष्टि: सम्भाविता वर्तते। राष्ट्रिय-राजधान्यामपि अद्य प्रात: अल्पवृष्टि: जाता यया जना: सुखम् अनुभूतवन्त:।

जम्मूकश्मीरः-पर्यटनम्

जम्मू-कश्मीरे अनुच्छेदस्य सप्तत्यधिक-त्रिशतमि इत्यस्य निरसनानन्तरं पर्यटनक्षेत्रे अप्रतिमः विकासः अभवत् । विगतवर्षे एकादश-लक्षाधिक-द्विकोटिः पर्यटकैः अस्य केन्द्रशासित-प्रदेशस्य यात्रा कृता तत्रैव अस्य वर्षस्य जूनमासे अष्टलक्षाधिकैक-कोटिः पर्यटकाः तत्र गताः । अद्य राजसभायाम् प्रश्नकालावधौ गृहराज्यमन्त्री नित्यानन्दरायः इमां सूचनां प्रकाशितवान् ।

।। इति वार्ता: ।।